International Research Journal of Education and Technology
Peer Reviewed Journal
ISSN 2581-7795

# अपाणिनीयव्याकरणनिकाये मुग्धबोधव्याकरणस्य माहात्म्यम्

Amit Sana

*PhD Research scholar,Department of sanskrit, University of Burdwan , Rajbati, Bardhaman,WestBengal*

---------------------------------------------------------------------***---------------------------------------------------------------------

**सारसंक्षेपः (Abstract)**

विश्वस्य सर्वेषां मानवानां भावस्यादानप्रदाने प्राधान्येन भाषयैव सम्पाद्येते। कस्याश्चित् भाषायाः मानवसभ्यतायां विद्यमानार्थं तस्याः सुसंबद्धं व्याकरणमावश्यकम्। व्याकरणेनैव भाषा मार्जिता संस्कृता च भवति। यद्यपि आदौ लोके भाषा प्रचलिता तदनन्तरञ्च तस्याः व्याकरणं तथापि अद्यत्वे अस्माभिः व्याकरणमादाय एव शब्दानां साधुत्वासाधुत्वनिर्णयः क्रियते। तस्मादेव व्याकरणं शब्दानुशासनशास्त्रमित्यभिधयापि अभिधीयते। विश्वस्य विद्यमानासु भाषासु अन्यतमायाः तथा प्राचीनायाः भाषायाः संस्कृतभाषायाः व्याकरणमतीव सुसंगठितं वैज्ञानिकञ्च। संस्कृतव्याकरणस्य मूर्ध्निभूत आचार्यो हि पाणिनिः। तेन स्वविरचिते *अष्टाध्यायी*ग्रन्थे वैदिकानां लौकिकानां च शब्दानां यथार्थतया अनुशासनं कृतम्। भाषा लोकव्यवहारेण सर्वदा परिवर्तिता परिवर्धिता च भवति, कालेन सर्वासु भाषासु नवीनशब्दानामन्तर्भावश्च परिलक्ष्यते। पाणिनिविरचितस्य *अष्टाध्यायी*ग्रन्थस्य काठिन्यत्वात् व्याकरणे साधारणजनानां सुप्रवेशाय भाषायां संयोजितशब्दानां साधुत्वप्रतिपादनाय पाणिनेः परवर्तिनि काले बहवः अपाणिनीयव्याकरणसम्प्रदायाः समुद्भूताः। पाणिनेः उत्तरकाले प्रवर्तितेषु

व्याकरणसम्प्रदायेषु वोपदेवविरचितं *मुग्धबोधव्याकरणम*न्यतमम्। अपाणिनीयव्याकरणसम्प्रदाये *मुग्धबोधव्याकरणस्य* स्थानं माहात्म्यं च प्रतिपादनाय अस्मिन् निबन्धेः प्रयासो विहितः।

**वोपदेवः**

मुग्धबोधव्याकरणस्य सर्वाधिकं प्रचलनं यद्यपि वङ्गदेशे परिलक्ष्यते परन्तु अस्य रचयिता वोपदेवः महाराष्ट्रप्रदेशस्य वरदातटाख्ये ग्रामे एकस्मिन् वैद्यकपरिवारे अजायत। तस्य पीतासीत् केशवः पितामहश्च महादेवः। अस्य गुरुरासीत् धनेशः। ग्रन्थेऽस्मिन् ग्रन्थकारस्य वेदपदः, वेदपदोक्तः, वेदपदस्पदः इत्यादीनि नामानि उपलभ्यन्ते। रामचन्द्राचार्यस्य *प्रक्रियाकौमुदीग्रन्थे* भट्टोजिदीक्षितस्य *वैयाकरणसिद्धान्तकौमुदीग्रन्थे* वोपदेवस्य उल्लेखः अस्माभिः प्राप्यते। अतः वैयाकरणोऽयं त्रयोदशशतके विद्यमानः आसीदिति वक्तुमुचितम्।

**मुग्धबोधव्याकरणं तस्य माहात्म्यं च**

वोपदेवविरचितस्य मुग्धबोधव्याकरणस्य अपाणिनीयव्याकरणसम्प्रदाये प्रसिद्धिः। अपाणिनीयं नाम न तु पाणिनीयव्याकरणभिन्नम्, व्याकरणमिदन्तु पाणिनीयव्याकरणमुपजीव्यैव विरचितम्। अतः अपाणिनीयशब्दस्यार्थः अत्र पाणिनीयव्याकरणसदृशम्। पाणिनीयव्याकरणस्य प्रचारसमये एव अपाणिनीयव्याकरणसम्प्रदायाः प्रादुर्भूताः सन्तः सममेव प्रचारिताः प्रसारिताश्च।

वोपदेवेन स्वकीयग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारप्राप्तं मङ्गलमाचरितं ग्रन्थादौ ग्रन्थान्ते च।मुग्धबोधव्याकरणे

International Research Journal of Education and Technology
Peer Reviewed Journal
ISSN 2581-7795

चतुरशीत्यधिकैकादशशतं सूत्राणि सन्ति। ग्रन्थेऽस्मिन् केवलं लौकिकानां शब्दानामेव साधुत्वासाधुत्वनिर्णयार्थं सूत्राणि प्रणीतानि, न तु वैदिकानाम्। वोपदेवस्य *मुग्धबोधव्याकरण*रचनायाः मुख्यमुद्देश्यमासीत् संस्कृतव्याकरणे साधारणजनानां सुखेन प्रवेशसिद्धिः। अतः तेन *अष्टाध्याय्याः*प्रायेण तृतीयांशेन सूत्रेण शब्दानुशासनं कृतम्। पाणिनीयव्याकरणे यथा पूर्वाचार्यप्रसिद्धाः महत्यः संज्ञाः गृहीताः परन्तु वोपदेवेन लाघवाय संज्ञाप्रकरणे सर्वाः संज्ञाः लघ्वीकृताः।

तेन ह्रस्वदीर्घप्लुताः इति महत्यः संज्ञाः न प्रयुज्य तत्परिवर्तनेन स्वर्घप्लुः इति लघ्व्यः संज्ञाः प्रयुक्ताः। तेन सूत्रं प्रणीतम् – "आ वत् स्वर्घप्लु"[i] इति। अव्ययमित्यस्य परिवर्तनेन तेन व्यमिति संज्ञा स्वीकृता। तदर्थं तेन सूत्रं प्रणीतम् - "स्वरादिनिञ्चित्यं व्यम्"[ii] इति। धातुसंज्ञायाः परिवर्तनेन "भ्वादिर्धुः"[iii] इति सूत्रं विरच्य धुसंज्ञा स्वीकृता।पाणिनिना *अष्टाध्याय्यां* प्रत्ययसंज्ञायाः सूत्रं सूत्रितम् - "प्रत्ययः"[iv] इति, परन्तु वोपदेवेन प्रत्ययशब्दस्य परिवर्तनेन केवलं त्यः इति संज्ञा स्वीकृत्य सूत्रं प्रणीतम् - "परस्त्यः"[v]इति। किञ्च पाणिनिना *अष्टाध्याय्यां* प्रकृतेः परं प्रत्ययानां विधानार्थं "प्रत्ययः", "परश्च" इति सूत्रद्वयं प्रणीतं परन्तु वोपदेवेन "परस्त्यः" इति एकेनैव सूत्रेण तत् प्रतिपादितम्। अस्य सूत्रस्य वृत्तौ वोपदेवेन उच्यते - "प्रकृतेः परो यः स त्यसंज्ञः स्यात्" इति। एवंप्रकारेण विभक्तिरिति महतीं संज्ञां न स्वीकृत्य क्तिः इति लघ्वी संज्ञा स्वीकृता, निपातसंज्ञायाः परिवर्तनेनकेवलं निः इति संज्ञा स्वीकृता, बृद्धिसंज्ञायाः परिवर्तनेन ब्रिः इति, सवर्णसंज्ञायाः परिवर्तनेन र्णः, पदशब्दस्य परिवर्तनेन केवलं दः इत्यादयोः लघ्व्यः संज्ञाः

प्रवर्तिताः वोपदेवेन येन अनायासेन शब्दानुशासनस्य बोधो भवति।

वोपदेवेन करणसंज्ञायाः परिवर्तनेन धः इति संज्ञा गृहीताः। पाणिनिना स्त्रीप्रत्ययविधानार्थं "क्रीतात् करणपूर्वात्"[vi] इति सूत्रेण यदुक्तं वोपदेवेन "धात् क्रीतात्"[vii] इति अल्पतराक्षरविशिष्टेन सूत्रेण तदेव प्रतिपादितम्। कारकप्रकरणे *अष्टाध्यायी*ग्रन्थे "प्रातिपदिकलिङ्गपरिमाणवचनमात्रे प्रथमा"[viii], "सम्बोधने च"[ix] इति सूत्रद्वयेन यत् प्रतिपादितं तदेव वोपदेवेन "ल्यर्थसम्बुद्ध्युक्तात् प्री"[x] इति सूत्रेण बोधितम्। अस्य सूत्रस्य वृत्तावुच्यते वोपदेवेन - "लेरर्थे सम्बोधने त्यैरुक्तार्थे के सति च प्री स्यात्" इति। अत्र तु ग्रन्थकृता सम्बोधने प्रथमाविधानाय पृथक् सूत्रं न विरचितम्।एवंप्रकारेण सर्वेषां कारकाणां सर्वासां विभक्तीनाञ्च अल्पायासेनैव तेन बोधनप्रयासः विहितः, येन प्रथमपाठार्थिनां सविधे संस्कृतव्याकरणज्ञानं सुकरं भवति। *अष्टाध्यायी*ग्रन्थे अस्माभि शताधिकानिकारकविभक्तिसम्बन्धीनि सूत्राणि सन्ति परन्तु मुग्धबोधव्याकरणे केवलं सप्तत्रिंशत् सूत्राणि वर्तन्ते।सप्तत्रिंशद्भिरेव सूत्रैः तत्र कारकनियमाः प्रपादिताः।

प्रकृतेः परं ये प्रत्ययाः विधीयन्ते तेषु तद्धितप्रत्ययाः अन्यतमाः। शब्दादुत्तरं विहिताः प्रत्ययाः एव तद्धितपदवाच्याः। तेभ्यः प्रसिद्धेभ्यः प्रयोगेभ्यः हिताः प्रत्ययाः तद्धितप्रत्ययाः इति व्युत्पत्त्या प्रसिद्धशब्दानां सिद्धये पाणिनिना बहवः तद्धितप्रत्ययाः स्वीकृताः। तद्धितेषु केवलम् अपत्यार्थकप्रत्ययविधायकानि शताधिकानि सूत्राणि पाणिनिना विरचितानि परन्तु वोपदेवेन मुग्धबोधव्याकरणे अपत्यार्थविधायकं

केवलम् एकमेव सूत्रं प्रणीतम् - “बाह्वाद्यतोऽत्र्यावादेर्गर्गादेर्नड़ादेः पितृस्वस्रादे रेवत्यादेः शेषशिवादेः ष्णि-ष्णेय-ष्ण्य-ष्णायन-णीय-ष्णिक-ष्णा अपत्ये”[xi] इति।सूत्रस्यास्यार्थो हि बाह्वादिशब्दादुत्तरम् अकारान्तशब्दात् परञ्च अपत्यार्थे ष्णिप्रत्ययो भवति, अत्र्याबादिशब्दादुत्तरम् अपत्यार्थे ष्णेयप्रत्ययः, गर्गादिशब्दादुत्तरं ष्ण्यप्रत्ययः, नड़ादिशब्दादुत्तरं ष्णायनप्रत्ययः, पितृस्वस्रादेः णीयप्रत्ययः, रेवत्यादेः ष्णिकप्रत्ययः, शेषशिवादेः ष्णाप्रत्ययश्च भवति। पाणिनिना प्रत्येकं गणानां कृते पृथक् पृथक् सूत्राणि प्रणीतानि। पाणिनिना रेवत्याः अपत्यमित्यर्थे रैवतिकः इति पदसिद्ध्यर्थम् आदौ “रेवत्यादिभ्यष्ठक्”[xii] इति सूत्रं तदनन्तरञ्च “ठक्येकः” इति सूत्रद्वयं विरचितं परन्तुं वोपदेवेन एकेनैव सूत्रेण कार्यमिदं साधितं लघूपायेन। *मुग्धबोधव्याकरणे* स्वल्पसंख्यकाः तद्धितप्रत्ययाः विहिताः परन्तु पाणिनिविरचितायाम् *अष्टाध्याय्याम्* अधिकाः प्रत्ययाः विहिताः।

## उपसंहारः

एवंप्रकारेण संस्कृतव्याकरणस्य सर्वेषु प्रकरणेषु मुग्धबोधव्याकरणकृता वोपदेवेन लघूपायेन शब्दानुशासनज्ञानाय यो महान् प्रयासो विहितः स तु अतीव प्रशंसार्हः। तस्मादेव व्याकरणमिदं सुप्रसिद्धस्य पाणिनीयव्याकणस्य सद्भावेऽपिलोके समधिकां जनप्रियतां लेभे । अन्येषु अपाणिनीयव्याकरणसम्प्रदायेषु विद्वद्भिः मुग्धबोधव्याकरणस्यैव माहात्म्यं कीर्त्यते। वोपदेवस्य मुग्धबोधव्याकरणमादाय बहवः टीकाग्रन्थाः विरचिताः। तेषु दुर्गादासविद्यावागीशविरचिता सुबोधा, रामचन्द्रतर्कवागीशविरचिता प्रमोदजननी,

राधावल्लभपञ्चाननविरचिता सुबोधिनी, गङ्गाधरतर्कवागीशविरचिता सेतुसङ्ग्रहटीका अन्यतमा। परवर्तिनि काले विविधेषु ग्रन्थेषु मुग्धबोधव्याकरणस्य उद्धृतीनां प्राप्तत्वात् तथा बहुभिः विद्वद्भिः ग्रन्थमिमं टीकारचनायां मूलरूपेण स्वीकृतत्वात् अस्य व्याकरणस्य लोके प्रचलनं माहात्म्यञ्च सुस्पष्टमेव। यद्यपि अद्यत्वे अपाणिनीयव्याकरणानां पठनपाठनादिकं महाविद्यालयेषु विश्वविद्यालयेषु च तथा न दृश्यते परन्तु बालानां संस्कृतव्याकरणप्रवेशाय व्याकरणमिदमतुलनीयमेविति शम्।

**अन्त्यटीका**

[i]मुग्धबोधव्याकरणम् ५
[ii]तदेव ९४
[iii]तदेव ११
[iv]अष्टाध्यायीसूत्रम् ३/१/१
[v]मुग्धबोधव्याकरणम् १८
[vi]अष्टाध्यायीसूत्रम् ४/१/५०
[vii]मुग्धबोधव्याकरणम् २६६
[viii]अष्टाध्यायीसूत्रम् २/३/४६
[ix]तदेव २/३/४७
[x]मुग्धबोधव्याकरणम् २८०
[xi]तदेव ४१५
[xii]अष्टाध्यायीसूत्रम् ४/१/१४६

**निर्वाचितग्रन्थपञ्जिः**

दाहालः, लोकमणिः. *व्याकरणशास्त्रेतिहासः.* दिल्ली. भारतीय विद्या प्रकाशन, २००७.

दासः, करुणासिन्धुः. *संस्कृत व्याकरण ओ भाषा प्रसङ्ग.* कोलकाता. सदेश, २००५.

दीक्षितः, भट्टोजी. *वैयाकरणसिद्धान्तकौमुदी.* (द्वितीयो भागः) सम्पा. गिरिधरशर्मा परमेश्वरानन्दशर्मा च. दिल्ली. मोतीलाल बनारसीदास, २०१०.

पाणिनिः, *अष्टाध्यायी.* सम्पा. सत्यनारायणचक्रवर्ती. कलकाता. संस्कृत पुस्तक भाण्डार, २००५.

मीमांसकः, युधिष्ठिरः. *संस्कृत व्याकरण शास्त्र का इतिहास.* (प्रथम भाग) वाराणसी. चोखम्बा पब्लिसर्स, २००३.

वरदाराजः. *लघुसिद्धान्तकौमुदी.* (पञ्चम भाग) सम्पा. भीमसेनशास्त्री. दिल्ली. भैमी प्रकाशन, २०१०.

वोपदेवः, मुग्धबोधव्याकरणम्. सम्पा.
जीवानन्दविद्यासागरभट्टाचार्यः. वाराणसी.
चौखम्बा विद्याभवन, १९९४.
वोपदेवः. *मुग्धबोधव्याकरणम्.* सम्पा.
निरञ्जनस्वरूपब्रह्मचारी. कलिकाता.
श्रीसुरेन्द्रनाथ को अपारेटिभ एस्टेट, १६७७.